र्वतइत्येतादृशपरामर्शदशायां धूमाभाववतिधूमप्रकारकप्रमित्येतादृशाप्रामाण्यग्रहे सत्येतादृशपरामर्शी

प

यप्रत्यक्षप्रकारतायां तोपदर्शितसंबंधावच्छिन्नाधेयत्वावच्छिन्नप्रतियोगिताकाभावो वर्तते तत्रोपदर्शितोभय
संबंधेनधूमत्वविशिष्टायां तादृशाप्रामाण्यज्ञानीयधूमप्रकारित्वप्रकारतातदवच्छेदकतावच्छेदकीभूतधूमत्वा

न

वच्छिन्नत्वसमवायतादृशसंबंधेनेतरत्रेणाधेयत्वावच्छिन्नस्याप्रामाण्यज्ञानस्यैव सत्वात्प्रतीतेरनुमितिप्रसंगः
आलोकाभाववतिधूमप्रकारकं इत्याकारकदशायां न तादृशपरामर्शेनानुमित्यनुपपत्तेः तादृशपरामर्शीय
धूमप्रकारतायां आलोकाभाववतिआलोकप्रकारकं इत्येतादृशज्ञानीयप्रकारित्वप्रकारतानिरूपकीभू
तावच्छेदकतावच्छेदकीभूतालोकत्वावच्छिन्नत्वविरहात् आलोकाभाववतिधूमप्रकारकमित्येतादृशज्ञानी

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

प.रू.
१४

पक्षधर्मप्रकारित्वप्रकारतावच्छेदकतावच्छिन्नत्वपक्षेऽपि तादृशधूमप्रकारित्वप्रकारताया उपदर्शितसंबंधेन केनापि धर्मे
णाविशिष्टत्वात् साध्याभाववद्विशेष्यकत्वावच्छिन्नत्वप्रकारतानिरू. पितत्वेच स्वानिरू. पकप्रकारतानिरू. पित
त्वसंबंधेन साध्याभाववत्त्वनिष्ठावच्छेदकताभिन्नावच्छेदकताविशिष्टयत्तत्स्वत्वनिष्ठावच्छेदकतानिरू. पकप्र
तियोगितासंसर्गावच्छिन्नप्रकारतानिरू. पिताभावप्रकारकतानिरू. पिताधिकरणताप्रकारतानिरू. पितविशेष्य
क[illegible] प्रकारतानिरू. पितावच्छिन्नत्वप्रकारतानिरू. पितत्वस्य व्याप्तुतेनीलधूमाभाववति धूमप्रका
रकमिसेतादृशज्ञाने धूमप्रकारकत्वादिविषयताया अपि उपदर्शितोभयसंबंधेन धूमत्वाद्यविशिष्टत्वात्ता न
तादृशज्ञानकाले धूमादिपरामर्शादनुमित्यनुपपत्तेः इदानीं तु तादृशज्ञानीयधूमत्वादिनिष्ठप्रतियोगितासंस
र्गावच्छिन्नप्रकारतावच्छेदकतायाः स्वानिरू. पकप्रकारतानिरू. पितत्वसंबंधेन नीलादिनिष्ठावच्छेदकताविशिष्ट
त्वात् तादृशसंबंधेनावच्छेदकताविशिष्टयत्तत्स्वत्वनिष्ठावच्छेदकताकप्रकारताया उपदर्शितसंबंधेन तादृशज्ञा
नीयप्रकारित्वाविषयताया धूमत्वादावविशिष्टत्वाभावात् नानुपपत्तिर्भेदप्रतियोगितावच्छेदकीभूतावच्छेदकता १४

टि.तो.२

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

प

यांसाध्यसामान्यत्वनिष्ठावच्छेदकताभिन्नत्वनिवेशात् वह्निव्याप्यधूमाभाववान् वह्निव्याप्यधूमप्रकारकाभिन्नस्तादृ
शज्ञानीयप्रकारतावत्संग्रहः एवं सति वह्निव्याप्यधूमाभाववानिति धूमप्रकारकाभिन्नस्येतादृशज्ञानीयप्रकारताया
अप्रसिद्धेर्विनोपपत्तेर्वंधेन धूमत्वादिविशिष्टत्वात्तादृशज्ञानकालेऽनुमित्युत्पादापत्तिः तादृशज्ञानस्य नील
धूमाभाववानिति धूमप्रकारकाभिन्नस्येतादृशज्ञानत्वमशीलतयाप्रामाण्यज्ञानानात्मकतया इदं यत्नेरयोगाद्यति
वेततादृशप्रत्यक्षेऽनुमित्युत्पादस्य प्रामाणिकत्वे स्वावच्छिन्नानिरूपितत्वसंबंधावच्छिन्नावच्छेदकताकत्वमत्र
स्वावच्छिन्नावच्छेदकतायाः साध्यसामान्यतावच्छिन्नत्वमपि निवेशनीयं यथाव्याप्यत्वाविषयकाणां धूमाभाववति
धूमप्रकारकाभिन्नस्येतादृश्याप्रामाण्यग्रहास्यावह्न्यगोचराभावो निवेशनीयः तत्र च प्रतियोगितावच्छेदको
भृ.तावच्छेदकतायां साध्यसामान्यत्वनिष्ठावच्छेदकताभिन्नत्वमनिवेश्य प्रामाण्यतोऽवच्छेदकताविशिष्टसामान्यत्व
मेवह्निनिष्ठावच्छेदकतायां निवेशनीयं स्वावच्छिन्नानिरूपितत्वसंबंधावच्छिन्नावच्छेदकतेत्यत्राभिमतावच्छेद
कतायां साध्यसामान्यत्वावच्छिन्नत्वमापन्ननिवेशनीयामिति ज्ञानीयविशेषणधूमाभाववति धूमप्रकारकाभिन्नस्येतादृ

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

म.अ.
१५
15

शज्ञानकाले धूमादिपरामर्शादनुमित्युपपत्तये वह्निनिष्ठावच्छेदकतायां निरवच्छिन्नत्वमपि निवेशनीयं वह्निव्याप्यवती
लधूमवानयं वेतद्व्याकारकपरामर्शानां लक्षमाणाववतिनीलधूमप्रकारकमित्येतादृशाप्रामाण्य ग्रहदशे
वह्निव्याप्यजातिविशेषवद्धानित्येतादृशपरामर्शाज्जातिविशेषाभाववतिजातिविशेषप्रकारकमित्येता
दृशाप्रामाण्यग्रहदशायामनुमित्यापत्तिरितिताछांकनीयाः तदपि दर्शितवह्निव्याप्यवान्नीलधूमवान्नवापर्व
तवह्निव्याप्यजातिविशेषवद्धान्नवापर्वत इत्येतादृशावधारणाद्यपादनुमित्यापत्तिवारणाय वस्तुतस्त्वत्राप्यनुमित्याप
त्तिवारणाय एकत्र द्वयमिति रीत्या प्रामाण्यग्रहदशायां तेषु हर्षान्तरस्याप्यनुमित्यनुत्पादप्रसङ्गादिति तत्स्वरूपायानुमितिं
प्रति तत्स्वरूपयोग्यप्रामाण्यग्रहाभावविशिष्टव्याप्यप्रकारताशालिपरामर्शत्वेन हेतुतावच्छेदकत्वमिति तत्स्वरूपभेदे
नानन्तकारणताप्रसङ्ग इति चेत् एवमपि हेतुतावच्छेदकरूपविषयतायां तत्स्वरूपाभेदेनैव न्यायावच्छेदकरत्वात् व्यापके
नासामाना[illegible]धिकरणापन्नानेहेतुतापेक्षया लाघवमस्तु रूपद्वयवत्तातामेवमपि उपदर्शितोभयरूपवैधर्म्येन हाम.
किं विरुद्धमविशिष्टयाप्यशायप्राप्तस्वप्रकारतानिरवच्छेदकतावच्छेदकधर्मावच्छिन्नत्वेन स्वविधेयतासामान्ये प्रामाण्यग्रहाभावस्य १५

का २

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

व्यप्रकारतायां निवेशोपि सम्बन्धः साध्यपरामर्शीयं ज्ञानं धूमाभाववति धूमप्रकारकं चित्सामान्यग्रहस्तत्वेभ्रमादि
पद परामर्शान्तरादप्यनुमित्युदयप्रसंगो ऽतो वीरहवन्तद्दीयप्रमाण्यप्रकारता सामान्यपि उपदर्शितो मयैवं बंधेन
तादृशासामान्यग्रहत्वात् अतो विशेष्यताप्रकारतावच्छिन्नासामान्यग्रहाभावस्यैव परामर्शविशेष्यत्व
सुपपन्नेनन्तत्वाद्धेतुतावच्छेदकानिवेशात् सामानाधिकरण्यरूपकस्येवानवगाहदृश[illegible]प्रकारित्वप्रकारतावच्छेदकता
वच्छेदकधर्मावच्छिन्नत्वं तादृशप्रकारित्वप्रकारतानिरूपितविशेष्यतास्थाप्यहेतुमन्निरूपितत्वाभावप्रसंबंधे
नैवज्ञानत्वावच्छिन्नाभावोनिवेश्यश्चैनीः उक्तस्थले वह्नितोपपरामर्शीयधूमप्रकारतायास्तादृशासामान्याराप
जातीयतत्त्वाविधप्रकारित्वप्रकारतावच्छेदकतावच्छिन्नत्वेपि सोयमादृशप्रकारतानिरूपितविशेष्यता
प्रयप्रथमपरामर्शानिरूपितत्वाभावात् उक्तोभयप्रसंबंधावच्छिन्नतानवच्छिन्नप्रतियोगिताकाभावोऽक्ष
तएवेतिलाघवप्रतियोगितावाच्यं एवं तथापि पर्वतो धूमवान् धूमपरामर्शान्तरस्यापि ज्ञानं धूमाभाववति धूमप्र[illegible]का
रकं मालिज्ञानमपालोकालोकाभाववत्यालोकप्रकारकोभयपरामर्शविशेष्यकसमूहालंबनासामान्यग्रहः तदुक्तं रव

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

द्वितीयधूमपरामर्शः तद्वन्नंतरमर्शात् तद्वन्नंतरमनुपपत्तेर्ईश्वरत्वात् तज्ज्ञाद्वितीयधूमपरामर्शीयधूमप्रकारताया
स्तादृशाप्रामाण्यज्ञानीयतथाविधधूमप्रकारिताप्रकारतावच्छेदकतावच्छेदकधूमत्वावच्छिन्नत्वात् तत्तथ
तथाविधालौकिकप्रकारित्वप्रकारतानिरूपितविशेष्यताश्रयद्वितीयपरामर्शनिरूपितत्वाद्युक्तोभयसंबंधे
न तत्तादृशाप्रामाण्यग्रहस्यैव सत्त्वात्। यदि च स्वावच्छेदकतावच्छेदकधर्मावच्छिन्नत्वस्वनिरूपितविशेष्य
ताश्रयज्ञाननिरूपितत्वोभयसंबंधेन ज्ञानीयतथाविधधर्मप्रकारित्वप्रकारतायाः एतादृशाप्रामाण्यप्रकारतायां नि
वेश्यते उपदर्शितसमूहालंबनाप्रामाण्यज्ञानीयतत्प्रकारित्वप्रकारतावच्छेदकतावच्छेदकावच्छिन्नो द्वितीय
यपरामर्शीयधूमप्रकारितायां न तन्निरूपितविशेष्यताश्रयज्ञाननिरूपितत्वोभयसंबंधेन तत्तज्ज्ञानीय
तथाविधप्रकारित्वप्रकारतायाः स्वाश्रयावबोध्यत्वे तदनुपपत्तिरिति विभाव्यते तदा तथापि ज्ञानव्यक्तिभेदेनाव
क्षयतानेदानेस्मुपरामे द्वितीयपरामर्शीयधूमप्रकारतायास्तादृशोभयसंबंधेन तादृशाप्रामाण्य राप.
ज्ञानीयप्रकारित्वप्रकारताविशिष्टाया प्रथमपरामर्शीयधूमप्रकारतानतद्भिन्नतादृशोभयसंबंधावच्छिन्न

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

न्नप्रतियोगिताकत्वस्याविधप्रकारत्वप्रकारताभाववद्विलक्षणनिष्ठत्वादिति चेन्न मैवं प्रत्यक्षपरामर्शेः आमाण्यग्र
हे तत्समानाकारकानुमानपरामर्शात् द्विताद्वनुमितिर्न स्यात् एव स्याव न्नत स्य विनाश इति न काचिद्दप्पनु
पपत्तिः अप्रयत्र वह्निव्याप्यधूमवान् पर्वतो वह्निव्याप्यालोकवान् वेन् इ लेनाप इ शरमूहालेखना
मेतद्वयं ज्ञानं धूमाभाववति धूमप्रकारक [illegible] मित्याकारकाप्रामाण्यग्रहे तत्त्वानुमित्यापत्तिर्द्वा
रैव तादृशपरामर्शस्य उपदर्शितसंबंधावच्छिन्नप्रतियोगिताकाप्रामाण्यग्रहास्कंदितविशिष्टालोकप्रका
रताशालित्वात् तत्कालावच्छिन्नप्रतियोगिताकभेदस्याप्रकारतानिरूपितत्वावच्छिन्नप्रकारतानिरूपित
रताशालित्वात् तत्कालावच्छिन्नप्रतियोगिताकभेदव्यापकधूमवान् विशिष्टाया निरूढत्वस्य तादृशाभावसंबंधेन किं
यक्षतावच्छेदकावच्छिन्नविशेष्यताकत्वाभावसंबंधेन मतत्वात् तादृशसंबंधावच्छिन्नप्रतियोगिताकाप्रामाण्य
विरहविशिष्टत्वनिरूपणनिरासपरस्यापि तन्मतत्वात् इति तस्य तादृशवानिरासपरत्वयोः स्वातंत्र्येणानिवेशे न भेदाद्यमनुपपत्तिः तद्व
दाभाववविशिष्टाप्रामाण्यप्रकारतावत्तत्त्वावधानिरासपरत्वयोः स्वातंत्र्येणानिवेशे न भेदाद्यमनुपपत्तिः तद्व
नवयं तूपदर्शितोभयसंबंधेन किंचिद्धर्मविशिष्टत्वनिरूपणनिरासपरत्वाशरस्य संबंधावधयाघटकी भूतामा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

प्र.न.
२७
17

ष्मिप्रकारतानिरूपितत्वावच्छिन्नप्रकारताशालितेनैव तादृशसंबंधावच्छिन्नज्ञानाभावो निवेश्यते एवं च उक्तस्थले तादृ
शज्ञानाभावाप्रसिद्ध्या आवश्यकत्वविषयत्वावच्छिन्नप्रकारताघटितोभयसंबंधेन कस्यापि धर्मस्य वैशि
ष्ट्यं तादृशपरामर्शालंबनपरामर्शीयलिंगधर्मतावच्छिन्नप्रकारतायाश्च निरूपकत्वसंबंधावच्छिन्नप्रतियोगिता
काप्रामाण्यग्रहाभावविशिष्टत्वाभावात्तदाह यदेव धूमत्वादिनस्यत्वावच्छिन्नप्रतियोगिताकाभा
वप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताकत्वसंबंधावच्छिन्नत्वानिष्ठप्रतियोगि
तावच्छेदकभेदवत्त्वरूपसत्वावच्छिन्नभेदवत्त्वदलस्य त्वालोकत्वानिरूपितस्य तादृशपरामर्शे सत्त्वे
न स्वपदेनालोकत्वोपादानस्यावश्यकत्वेन भवति अतो न तत्रानुमित्यापत्तिरिति एवं च सिद्धिकाले धूमालिंगके
च्छापत्त्यैवालोकलिंगकपरामर्शकाले धूमालिंगकोक्तविरहविशिष्टसिद्ध्यभावसत्त्वात्तत्रानुमि
त्यापत्तिरिति स परामर्शत्वानादिहेतुताकल्पने मानाभाव इत्याशयकोपि यद्यक्तं तत्त्विनधूमलिंगकानुमि त्याप०
ति त्वावच्छिन्नप्रतिधूमलिंगकेच्छाविरहसहकृततद्विशिष्टभावत्वादिनानपक्षतादेहेतुत्वं अपितु सामान्य १७

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

४ निरूपितप्रकारता

तःपर्वतत्वावच्छिन्नविशेष्यताकवह्निविधेयताकानुमितित्वावच्छिन्नं प्रति वह्निव्याप्यवत्तानिर्णयविशिष्टपर्व
तत्वावच्छिन्नविशेष्यतानिरूपितवह्निविधेयताप्रकारताकानुमितौ व्यभिचारवारणाय हस्त(?)कृते सिध्यमा
नत्वादिनाशकमेव हेतुत्वं कल्प्यते तादृशपरामर्शविशिष्टं स्वत्वावच्छिन्नविशेष्यतानिरू
पिताप्याप्रिप्रकारतांतद्वच्छेदकधर्मावच्छिन्नलिंगक [illegible] प्रकारकत्वं सामान्याद्धि
कःरागोऽभयप्रबंधेनधूमत्वादिमत्त्वावच्छिन्नलिंगकत्वप्रकारिकातादृशोक्त्यावयेतादृशोभयपूर्वबंधे
नालोकत्वावच्छिन्नलिंगकपरामर्शविशिष्टाहूलितथाविधेच्छाकालेऽभिहितस्यालोकत्वावच्छिन्न
लिंगपरामर्शादनुमित्यापत्तिः तादृश विशिष्टपरामर्शरूपोत्तेजकाविरहादिति धूमपरामर्शत्वादि
नाहेतुत्वकल्पनेऽपि नैवोपपत्तिरिति नवैकत्रद्वयमितिरिसामग्रीकमिशेषे प्रपरवैशिष्ट्यमितिवासा
वाधूमलिंगकत्वालोकलिंगकत्वोभयप्रकारकानुमित्वावशिष्टमिदकालेतथाविधेकमात्रलि
गकपरामर्शादनुमित्यापत्तिः तादृशोक्तायांप्रपद्धर्शितोभयपक्षंबंधेनतथाविधपरामर्शविशिष्टत्वादि

४ दृक्ष
४ क

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

म.ते. १८ त 14

लि

तिविशिष्टधूमादिलिंगकानुमितित्वावच्छिन्नं प्रतिधूमामलिंगकत्वप्रकारतानिरूपितानुमितित्वविशेष्यताके
काविरहाविशिष्टविशिष्टमात्रवृत्तत्वादिनाहेतुत्वकल्पनमावश्यकमितिवाच्यं धूमावच्छिन्नलिंगकत्वप्रकार
तानिरूपितत्वस्यापि तद्धर्मावच्छिन्नलिंगकत्वप्रकारतानिरूपितत्वोभयसंबंधेन किंचिद्धर्मविशिष्टस्या
स्वीयमानिप्रकारतानिरूपितप्रकारतावच्छेदकधर्मावच्छिन्नलिंगकत्वप्रकारतानिरूपितानुमितित्वनि
ष्ठविशेष्यतातन्निरूपितत्वस्वसामानाधिकरण्योभयसंबंधेन परामर्शवैशिष्ट्यस्य कार्यतानिवेशानौ
यतया उपदर्शितैकानिरूपितानुमितिनिष्ठविशेष्यतायाः स्वोपदर्शितोभयसंबंधेन धूमत्वादिविशि
ष्टतया तादृशैकताया उक्तसंबंधेन परामर्शवैशिष्ट्याभावेनानुमित्यभावापत्तेरेवं च लाघवान्मात्रवद्वृत्तित्वरूप
व्याप्तिज्ञानहेतुतामते हेतुतावच्छेदकभेदेन परामर्शहेतुतानुमितित्वमात्री प्रतिबंधकभेदाभावप्रयु
क्तलाघवमस्तु समभेवीति संबंधनारिहानवर्थं यद्यदिनिराविलनिर्वचनानुरोधेनापि हेतुतावच्छेदकानिवेश रापु.
स्यावश्यकतालदाप्यापकसामानाधिकरण्यज्ञानहेतुतायामपि हेतुतावच्छेदकमनिवेश्य सर्वमुपपादं १८

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

यत्रइदृशामहेतत्वाद्व्यापकसामानाधिकरण्यप्रकारकपरामर्शस्तत्रावच्छिन्नव्यापकतावच्छेदकवह्नि
त्वाद्यवच्छिन्ननिरूपितसामानाधिकरण्यावच्छिन्नायास्तावच्छिन्नप्रकारतायानिरूपितपक्षतावच्छेदकाव
च्छेदकावच्छिन्नविशेष्यताकत्वसंबंधेनकिंचिद्धर्मावच्छिन्नविशेष्यत्वेपिवह्नेस्तत्ताकव्यापकत्वेनधूमव्यापकवह्निस
मानाधिकरण्यधूमवान्पर्वतइत्यादिपरामर्शस्थलेतादृशसंबंधेनधूमत्वादिविशिष्टस्यैवप्रतीतत्वात्तस्मात् नै
रूपितत्वस्यघटनायधूमव्यापकवह्निसमानाधिकरणालोकवान्पर्वतइत्यादिनिर्णायकप्रतीतौतादृशसंबंधेन
केनापिधर्मेणाविशिष्टत्वात्तादृशज्ञानीयपक्षविशेष्यतानिरूपितालोकत्वाद्यवच्छिन्नप्रकारतायामालो
कत्वाद्यवच्छिन्नव्यापकतावच्छेदकवह्नित्वाद्यवच्छिन्ननिरूपितसामानाधिकरण्यावच्छिन्नत्वविरहात्
सघटेनालोकत्वस्यधूमत्वावच्छिन्नत्वविरहात्तेनसपक्षेनधूमत्वस्याप्युपादानंमहानसत्वादिनातावच्छि
न्नव्यापकतावच्छेदकवह्नित्वावच्छिन्नानिरूपितसामानाधिकरण्यावच्छिन्नेयस्यस्वनिष्ठावच्छेदकतानि
रूपकंयद्वृत्तितानिष्ठावच्छेदकत्वंतन्निरूपकंयदधिकरणतानिष्ठावच्छेदकत्वंतन्निरूपकंयदार्थेयत्व

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

म॰तं॰
१९
19

निष्ठमवच्छेदकत्वं तन्निरूपकं यद्यन्नावन्निष्ठमवच्छेदकत्वं तन्निरूपकं यत्प्रतियोगितान्निष्ठमवच्छेदकत्वं तन्नि-
रूपकं यत्स्वावच्छेदकतान्निष्ठमवच्छेदकत्वं तन्निरूपकं यद्यन्नावन्निष्ठमवच्छेदकत्वं तन्निष्ठयद्धेतुत्वन्निष्ठ-
मवच्छेदकत्वं तन्निरूपकं यद्वह्निनिष्ठमवच्छेदकत्वं तन्निरूपकं यदधिकरणतान्निष्ठमवच्छेदकत्वं तन्निरू-
पकं यद्धूमत्वन्निष्ठमवच्छेदकत्वं तन्निरूपकमित्यर्थः। वाच्यत्वद्वारा हेतुसमानाधिकरण्यावच्छेदकत्वमात्र-
निवेशे धूमसमानाधिकरणाधूमवान्नित्यादिविषयत्वापत्तेस्तु नित्याद्यापत्तेः। इंधनव्यापकवह्निसमानाधिकरणाधू-
मवान्नित्यादिपरामर्शादनुमित्यनुदयापत्तेस्तथा नीलधूमसमानाधिकरणाभावप्रतियोगितानवच्छेदकव-
ह्नित्वावच्छिन्नवह्निसमानाधिकरणधूमवान्नित्यादिज्ञानवारणाय च स्वनिष्ठावच्छेदकत्वे स्वनिरूपकतावच्छे-
दकनिरूपितत्वसंबंधेनावच्छेदकताविशिष्टस्यत्वं निवेशनीयं नीलधूमत्वावच्छिन्नलिंगकपरामर्शादीनां च
ष्टपयोगेव हेतुताव्याप्यसाध्याभावावद्वह्नित्वरूपव्याप्तिज्ञानहेतुतावाधितापितत्र स्वनेत्र हेतुतायाः स्वहेति
तत्वात एवं ज्ञातिविशेषवत्समानाधिकरणाभावप्रतियोगितावच्छेदकवह्नित्वावच्छिन्नसमानाधिकर
न

राम॰
१८

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

णाद्धूमवान्पर्वत इतिज्ञानवारणायाप्यनिरवच्छिन्नत्वं [illegible]निष्ठावच्छेदकतायां निवेशनीयं जातिविशेषत्वादिना धूमत्वादि-
देतावच्छेदकस्थले च द्रष्टव्यो वदेश्यत्वसमवेततापि तत्र सत्त्वादिति तन्न तदेवं धूमसमानाधिकरण्यघटाभाव-
प्रतियोगितानवच्छेदकवह्नित्वावच्छिन्नसमानाधिकरण्याद्धूमवान्पर्वत इत्यादिज्ञानवारणायाश्रयाधेयत्वनि-
ष्ठावच्छेदकतायामपि स्वनिरूपकावच्छेदकतानिरूपितत्वसंबंधेनाभावत्वावच्छेदकताविशिष्टसामानत्वम-
पि निवेशनीयं एवं च समप्रयोगमतिबंधकतायामपि हेतुतावच्छेदकविशिष्टव्याप्तिनिवेशप्रयोजनदर्शितरूपणापराम-
र्शनिवेशात्संभवतामाममन्यौ प्रतिबंधकताधिकरणमौल्लाइत्यं च शरीरगौरवमप्रामाण्यं वा प्रयोजकं [illegible] हेतुता- ५ मपि
ताव्यापकसामानाधिकरण्यज्ञानं सम्यगनुमितिहेतुत्वं निराबाधम[illegible]वंसादेतेतत्॥ व्यापकसामाना-
धिकरण्यज्ञानस्यानुमितिहेतुतामते पर्वतो वह्निमानित्याकारिका स्वरूपतो वह्नित्वावच्छिन्नविषये यत्रावगा-
हिन्यनुमितिहेतुरूपपादितत्वादित्याहुः धूमसमानाधिकरण्याभावप्रतियोगितानवच्छेदकवह्नित्वावच्छिन्नसमाना-
धिकरण्याद्धूमवान्पर्वत इत्याकारकपरामर्शापेक्षया तन्मते हेतुतानस्याव वह्नित्वत्वादिना वह्नित्वाद्यवगाहिनी अ-

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नुमितिरेव विरहविशिष्टपक्षता। परामर्शस्य यद्रूपावच्छिन्नसाध्यतावच्छेदकेतादृशप्रतियोगितानवच्छेदकत्वावगाहित्वं तद्
पक्षरूपत्वकारेणैव साध्यतावच्छेदकावगाह्यनुमितिजनकत्वमिति स्वभावसाव्यवधारणकार्यत्वात्रापि साध्यतादृश
प्रतियोगितानवच्छेदकजातिमत्समानाधिकरणधूमवान्पर्वत इत्यादिपरामर्शाद्धूमवत्पर्वतो वह्निमान् इत्येतादृशा
नुमित्यापत्तिः। अत एव जातित्वाद्यवच्छिन्नतादृशप्रतियोगितानवच्छेदकत्वावगाहिपरामर्शे जातित्वाद्यवच्छि
न्नविधेयतावच्छेदकताकानुमितित्वमेव जन्यतावच्छेदकं मतोपतिरूपतात्वहरूपतावाह्नित्वादिविधेयतापन्नुमितिः।
वह्नित्वत्वाद्यवच्छिन्नतादृशप्रतियोगितानवच्छेदकत्वावगाहिनः तादृशपरामर्शात्तादृशानुमितिसंभवे सेवता
दृशानुमितित्वमेव तत्तद्विधेयतापन्नत्वमतावच्छेदकत्वोपगमादिति चेत् तर्हि वह्नित्वत्वत्वावान्पर्वत इत्या
कारकवह्नित्वत्वावच्छिन्नविधेयताकानुमितिविलोपप्रसंगः। स्वरूपतो वह्नित्वादिविधेयतावच्छेदकताकानु
मितित्वस्यैव तत्तद्विधानुमितिजनकपरामर्शजन्यतावच्छेदकतायाः स्वीकृतत्वात्॥ अथ तत्तद्विधानुमितिराप.
त्वमपि जन्यतावच्छेदकमिति चेत्तर्हि स्वरूपतो वह्नि प्राच्यवह्नित्वत्वान्यत्वेति द्विविधविधेयताशालिन्यनुमिति २०

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

रेवाप्रसिद्धाद्यैकेन नियमतः स्यात्तन्न कदाचिद्धूपत्वेनैव लिङ्गं वह्नित्वमानं कदाचित्केवलं वह्नित्वत्वान्न वैतद्रूपाकारके
ति। एतच्चानुभवविरुद्धं। साध्याभाववद्वृत्तित्वरूपव्याप्तिज्ञाने हेतुतामतेन यत्साध्याभावप्रतियोगितावच्छेदकत्
त्वया स्वरूपतो वह्नित्वादिकं परामर्शे भासते तत्रानुमितावपि स्वरूपत एव वह्नित्वादि भासते। यत्र तु वह्नित्वत्वादिना
तत्रानुमितावपि तथैवेति नियमः संभवति। यत्र धूमेऽवच्छेदकत्वांशे निर्धर्मितावच्छेदककपरामर्शः स्वरू-
पतो वह्नित्वादिविधेयतावच्छेदकताकानुमितौ हेतुः। वह्नित्वत्वाद्यवच्छिन्नविधेयतावच्छेदकताकानुमितौ व
ह्नित्वाद्यवच्छिन्नेऽत्र नवच्छेदकत्वावगाहिपरामर्श इतेनानुमितेर्नियमतो द्विविधविषयताशालित्वप्रसंगा
द्वितीयपक्षे त्वत्र नेच्छेदकत्वांशे निर्धर्मितावच्छेदककबोधस्य व्यभिचारज्ञानाप्रतिबध्यतया तस्यानुमिति
हेतुत्वे व्यभिचारस्य हेत्वाभासत्वानुपपत्तिरित्यतो नैवं साध्याभावाधिकरणनिरूपकतावच्छेदकमुद्रया स्वरूपतो
वह्नित्वाद्यवगाहि हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकवह्नित्ववद्धूमवान्
पर्वत इत्याकारकपरामर्शः स्वरूपतो वह्नित्वादिविधेयतावच्छेदकताकानुमितौ हेतुः। यत्र तु वह्नित्वादिनैव

५ वि

न

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

प्र.त.
२१

ह्निमत्त्वादिकं सामानाधिकरण्यनिरूपकतावच्छेदकतया भासते न तु स्वरूपतस्तादृशपरामर्शः वह्निमत्त्वानिष्ठाका
रकानुमितिनाविनिनकाचिदनुपपत्तिः ॥ अथैवमपि प्रामाणिकपरामर्शात्केवलं पर्वतो वह्निमत्त्वानिष्ठाकारका
नुमितिर्न स्यात्तादृशपरामर्शे सामानाधिकरण्यनिरूपकतावच्छेदकविधया स्वरूपतो वह्निमत्त्वादेर्भाने
बाधकाभावान्न च स्वरूपतो वह्निमत्त्वादिविशिष्टोद्देश्यस्वरूपतो वह्नित्वाद्युपस्थितेरुक्तत्वात्तदुपकालीन
परामर्शे च तत्र वह्निमत्त्वादेर्भानं हेतुमाह इति वाच्यं स्वरूपतो वह्नित्वाद्युपस्थितिं विना वह्नित्वादिनापि व
ह्निमत्त्वादेर्भानासंभवात् वह्निमत्त्वादिभाने तच्छरीरघटकतया स्वरूपतो वह्नित्वादेर्भानस्याव श्यकत्वादि
ति चेन्न सामानाधिकरण्यनिरूपकतावच्छेदकमुख्यास्वरूपतो वह्नित्वाद्युपस्थितेर्वावश्यकत्वात्तादृशपरामर्शयोग्य
तावच्छेदे वह्निमत्त्वसामानाधिकरण्यावगाहिपर्वते इत्याकारकः परामर्शः प्रामाणिकः क्वचित्स्यात् इति मे
मेवानुमितिर्मितितदुपपाद्यमपि अयवादादिष्वेवं च तत्रैव वह्निमत्त्ववत्ता इत्याकारकानुमितिः निराबाधैव एत.
त्सलक्षणदावेशनेनापत्तेर्व्यापकत्वं स्वप्रतियोग्यनधिकरणहेतुमन्निष्ठाभावप्रतियोगितानवच्छेदकत्वं २१

३ र्क

न्हि

स

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

३ त्रि

ष्यतावच्छेदकवत्वात्तत्र हेतुपदार्थो नाभावत्वमात्रं किंत्वभावत्वमात्रम्प्रतियोग्यनधिकरणीभूतहेतुमत्त्वं सर्वत्रैवा
प्रसिद्धेः। अत एव तत्तद्व्यक्तिव्यपदेशवैयर्थ्यं वाच्यः तथा च तत्तत्प्रतियोगितावच्छेदकभेदकूटवत्त्वा ध्यता
वच्छेदकावच्छिन्नत्वमेव तादृशैकविशिष्टत्वं तादृशभेदकूटसमानाधिकरणरूपेणात्यन्ताभावप्रतियोगित्वेन
पिकर्तव्यमशक्यमिति व्यापकत्वमात्रनाधिकरणपदस्य प्रमाभिप्रायेण तिकत्वे त... ज्ञानस्यानुमितिहेतुता
नवभेदकूटसमानाधिकरणरूपेणात्यन्ताभावप्रतियोगितानवच्छेदकत्वमतो हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदक
प्रतियोगिकभेदसामान्याभावमेवाविवक्षितत्वात्। एतादृशाभाव एव व्यतिरेकिणि व्याप्तिः। व्यभिचारज्ञानाप्रतिबन्धकत्वात् हेतुशब्दार्थ
रूपेणात्यन्तानुमितेः प्रतियोगितयाग्राहकीयविशिष्टरूपत्वात्। नव साध्याभाववद्वृत्तित्वरूपव्यभिचारेऽपि साध्या
भावेऽवप्रतियोग्यनधिकरणहेतिरत्वसामानाधिकरण्यमतो व्याप्तिः... तत्र प्रतियोगितावच्छेदकसामा
परत्वेनानन्वयाभावात् ... व्याप्तिवच्छेदकावच्छिन्नाधिकर
... दिव्यानत्वरूपत्वमेवाश्रयाभावान्तसमानाधिकरणकावच्छिन्नत्वं स्वावच्छेदकावच्छिन्नाधिकर

५ मे
५ तु
वध्यतया ५
सो ३

५८ (२)

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

णानुयोगिकत्वो[...]भयसंबंधेप्रतियोगिताविशिष्टाभावापादनेऽधिकरण[...]निष्ठाधिकरणतानिरूपकाभा
वार्थकतयाऽननुयोगाभावाभावात्संयोगी द्रव्यत्वादित्यादेर्व्यभिचारसंयोगाधिकरणतानात्वात्तादृशोभयसंबंधेन सं
योगत्वावच्छिन्नप्रतियोगिताविशिष्टेवतद्वच्छेदकीभूतसंयोगत्वावच्छिन्नाधिकरणानुयोगिकत्वा
त्तादृशप्रतियोगितावच्छेदकीभूतसंयोगाभा[...]वादिनिरूपितत्वाद्धाश्रतत्वात्तादृशसंबंधेनप्रतियोगितावि
शिष्टाभावाप्रसिद्धाभावाधिकरणतेवत्तादृशाधिकरणतायांतादृशप्रतियोगितावच्छेदकावच्छिन्नाधिकरणा
नुयोगिकत्वं तादृशप्रतियोगितानिरूपकाभावनिरूपितत्वाभावे उक्तसंबंधे[...]द्रव्येनकस्याप्यधिकरणेऽपिप्र
तियोगितापर्याप्त्यवच्छेदकस्याभावान्नतादृशाधिकरणतानिरूपकाभावप्रतियोगितानवच्छेदकत्वं संयोग
त्वादावक्षेमेवेतिनतत्राव्याप्तिः संयोगी द्रव्यत्वादित्यादौ द्रव्याभिचारसंयोगाभावाधिकरणतायास्तादृशोभयसं

न

बंधेनप्रतियोगिताविशिष्टत्वेपिगुणात्मकदेहत्वधिकरणनिष्ठाधिकरणतानानात्वाविशेषाद्धिकरणाभेदे

नाधिकरणताभेदादितिनतत्राव्याप्तिरितिवक्तव्येदृश्यधिकरणनिरूपितत्वनिरवच्छिन्नाधेयत्वसामान्यविशे २२

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

घटत्वेनोपपत्तेः प्रतियोगिनि वैशिष्ट्यस्य नात्वातिनानुगमकंभावत्वात् अन्ये तु समपिलुप्तसमनियतगुरुधर्मावच्छि
न्नसाध्यकसमभिव्याहारस्थप्रतिसंबंधवारणाय स्वविशिष्टसंबंधविशिष्टाभावप्रतियोगितानवच्छेदकत्वं तत्स
मानाधिकरण्याभावप्रतियोगितावच्छेदकरूपवत्त्वं तद्रूपवत्त्वं विशिष्टसाध्यतावच्छेदकवत्त्वमेव व्यापकत्व
मित्यस्य वक्तव्यं वाक्यातथाच ह्रदे पक्षतावच्छेदके रेखांति वेताः भवन्ने तेपिनादृशगुरुधर्मावच्छिन्नसाध्यकस्थले तोमा
प्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभावाप्रसिद्ध्या व्याप्तिरतत्त्ववारणाय साध्यतावच्छेदकावच्छिन्ने
तिष्ठाभावप्रतियोगितानवच्छेदकधर्मावच्छिन्नाभाववद्वृत्तित्वं विवक्षणीया तत्र च गुरुधर्मस्यावच्छे
दकत्वमतेनादृशप्रतियोगितावच्छेदकतावच्छिन्नप्रतियोगिताकभेदवन्वे शानमशकांकद्वयोर्वाद्यमता
वच्छिन्नसमानाधिकरणाभावप्रतियोगितावच्छेदः समनियतघटत्वाद्यवच्छिन्नवृत्तित्वसामान्याभावप्रति
योगितावच्छेदकत्वापेक्षया गुरुत्वेन भेदप्रतियोगितानवच्छेदकतापत्तेः स्वावच्छिन्नप्रतियोगिताकभेदप्रति
क्षिशिति प्रतियोगितावच्छेदकत्वमक्तिः प्रातिस्विकरूपेणाभावादत्तामेदकूटस्यैवानिवेशप्रयोजनतत्वात्त्वानुयोगाः गुरु

३ दकत्वा १ ताव

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

प.त.
२३

23

धर्मस्य प्रतियोगितावच्छेदकत्वप्रतावच्छेदं च नैव तत्र मानाभावादिति न किंचिदेतत् । अत एव तेषां व्यापकतायां नाधिक-
रणत्वा व्याप्तिपरामर्शादेवानुमितिरिति न नियमः । परं तु कुत्रचित्ततः । कुत्रचिद्व्याप्तिज्ञानादेव वह्निर्जिताद-
रू. यथा । स्वव्याप्यपरामर्शाद्धमोत्सानिपमपक्षे धूमादेः साधीयान्यः । तादृशलिंगपरामर्शेऽवह्न्यभाववद्वह्निम-
त्पर्वतत्वावच्छिन्नधर्मिकसंशयानुमितिसामग्र्याः । एवं तादृशानुमितिविषयकपक्षतादिकं प्रति प्रतिबंधकताधि-
क्यं व्याप्यः । यत्र वह्न्यभाववद्वृत्तिमान्पर्वत इत्यादौ तादृशपरामर्शे घटत्ववद्व्याप्यानुमितिसामग्र्या तत्रा-
व्याप्यत्वं तादृशपरामर्शात्तद्व्याप्यानुमितिसामग्री प्रतिबंधकत्वे पर्वतोपपत्तेः । तत्कालान्प्रतिबंधकत्वाकल्प-
नात् । अत एव व्याप्यानुमितिसामग्र्यां पर्वतो वह्न्यभाववानित्येतादृशबाधाधारस्यापि वह्निविशेष्ये प्रतीयते तादृशा-
बाधादिकाले तद्धर्माविशिष्टानुमितिसामग्रीकालेपि तद्विषयकपक्षतासंभवादेव तादृशसामग्र्याः प्रतिबं-
धकत्वं नाव्यापकमिति चेन्न । एतेन तादृशव्याप्यकत्वं घटत्वाद्यवच्छिन्नविधेयकतादृशाविशिष्टधर्मावच्छिन्नपक्ष-
पक्षकानुमितिसामग्र्यां प्रतिबंधकतायाः प्रात्याः एवं सिद्धौ तादृशाविशिष्टधर्मावच्छिन्नपक्षकव्याप्तिमत्पर्वततदाश्रित्य २३

ते
क.वा

क

भ २

१ शो

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

व

त्वावच्छिन्नविधेयताकानुमितिसामग्र्यां प्रतिबन्धकताकल्पनप्रयुक्तलाघवमपेक्ष्य मेवं तादृशानुमितेः पर्वतो
वह्निमान् वह्निमांश्चेत्येतादृशबाधादिप्रतिबन्धकतया तत्सामग्र्याः काले बाधाद्यभावघटितपर्वतत्वावच्छिन्नपक्षीय
कानुमितिसामग्र्याः स्वरूपसाधारण्याच्छब्दमपि पर्वतो वह्निमानित्येतादृशानुमितिसामग्र्याः पर्वतो वह्नि
मानित्येतादृशानुमितिसामान्ये विशेषस्यावश्यकत्वात्तादृशाभावे कालेऽतथाविधघटानुमितिसामग्र्याः पर्वत
भिन्नाविषयकस्य प्रत्यक्षस्यावश्यकत्वात्तादृशसामग्र्याः प्रतिबन्धकत्वकल्पने मानाभावः स्वरूपकाभिधितिर्वैतादृशं पर्वतो वह्नि
त्वावच्छेदकवह्निमत्ताभिन्नत्वावच्छिन्नस्य प्रमत्वे साध्यतावच्छेदककोटौ पक्षतावच्छेदककोटौ पक्षतावच्छेद
ककोटौ वा प्रवेशाधिकं त्विमेतादृशविशिष्टप्रमत्वस्यावश्यकत्वात् साध्यतावच्छेदकनानात्वकं दितविशेषाभावघटि
तवह्न्यनुमितिसामग्र्याः स्वरूपकत्वात् एवं साध्याभावव्याप्यवत्त्वज्ञानादेवानुमितिरनुकूलत्वा
पकसामानाधिकरण्यज्ञानादिति व्याप्यव्यापकसामानाधिकरण्यज्ञानादनुमितिर्वोत्पत्तिः
पकसामानाधिकरण्यज्ञानादिति वाच्यं व्यापकसामानाधिकरण्यज्ञानादनुमितिः प्रतिबन्धकात्मविषयकप्रत्यक्षस्य
व्यापकवह्निमत्सामानाधिकरण्याद्यवस्थं तत्त्वावच्छिन्नपक्षकत्वघटितानुमितिसामग्र्याः भेदविषयकप्रत्यक्षस्य
४ विशिष्टं तादृशसामग्र्याः प्रतिबन्धकत्वाकल्पनप्रयुक्तलाघवं दुर्वारमेव तादृशानुमितिसामग्रीकाले पर्वतो वह्निमानि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

प

को

सत॰ २४

तिप्रतिबंधकताकल्पने व्यभिचारादर्शनदशायां भवात्। एवं व्याप्त्यभावव्याप्यकीभूतज्ञानाभावप्रतियोगित्व[illegible]रूपव्याप्तिज्ञानस्या
प्यनुमितिहेतुत्वमुपेयते तथा सत्यनुकरणालापवदं भवात्। किंच तत्र तत्र व्याप्तिज्ञानात्पर्वतो वह्निमानिति सा
कारिकाव्यतिरेकव्याप्तिज्ञानात्पर्वतो वह्न्यभावाभाववानित्याकारिकानुमितिर्जायते। अथोभयव्याप्तिज्ञानादेक
विधानुमितस्य यामे क्षतिविरहः परामर्शवैशिष्ट्यस्य कार्यतावच्छेदककोटौ वक्ष्यामि[illegible]वेशनीयत इत्येवं पर
स्परं व्यभिचाराप्रसक्तेः। न चोभयविधव्याप्तिज्ञानात्पर्वतो वह्निमानित्यनुमितिस्वीकारे सिद्धिप्रतिबंधकतायां
इच्छाविशिष्टपरामर्शानामुत्तेजकत्वमते पर्वतो वह्निमानित्येतादृशसिद्धिप्रतिबंधकतायामेकत्रान्वयव्या
प्त्यवगाहिपरामर्शव्यतिरेकव्याप्त्यवगाहिपरामर्शयोरेकत्रोत्तेजकत्वप्रसक्त्या तदभावप्रयोज्योभयोर्विशेषणावि
शेषाभावे विनिगमनाविरहेणाप्रतिबंधकताद्वित्वमिति वाच्यं व्यतिरेकव्याप्तिज्ञानात्पर्वतो वह्निमानित्यनुमिति
स्वीकारेऽपि पर्वतो वह्न्यभावाभाववानित्येतादृशसिद्धिप्रतिबंधकतायामेकत्र वह्न्यभावाभाववत्त्वविशिष्टनिरूपिता सम.
न्वयव्याप्तिविषयकपरामर्शोपदर्शितव्यतिरेकव्याप्तिविषयकपरामर्शयोरुत्तेजकतासंभवेऽनन्तदोषप्रसक्तेश्च॥ २४

डो ४

ग्री ३

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

त्वात्तादृशान्वयव्याप्तिज्ञानादपि पर्वतो वह्न्यभाववान्वा नित्येतादृशानुमितिस्तु मते ॥ किं चैतन्मते व्यतिरेकव्याप्यवगाहि
परामर्शजन्यानुमितौ प्रमात्वेन वह्न्याद्यप्रमात्वाद्याकारकबाधाद्यभावस्यापि विरुद्धत्वेन तथा तादृशपरामर्शघटिता
नुमितिसामग्र्याः प्रतिबन्धकतायां तथाविधबाधाभाववत्त्वनिवेशे न गौरवमिति चेत् व्यतिरेकपरामर्शात् वह्न्यभावा
भाववानित्येतादृशानुमित्याकारे प्रतियोगितासंबन्धावच्छिन्नप्रतियोगिताकवह्न्यभाववद्विशिष्टाभाववैशि
ष्ट्यावगाहिप्रत्यक्षादौ व्यतिरेकव्याप्यवगाहिपरामर्शघटितानुमितिसामग्र्याः प्रतिबन्धकताकल्पनेन लाघवं ।
तादृशपरामर्शघटितानुमितिसामग्रीकालेऽप्रमात्वेन वह्न्याद्यप्रमात्वाद्याकारक बाधाभावादेर्हेतुरावश्यकतया
विशेषणतावच्छेदकप्रकारकनिर्णयरूपकारणाविरहेणोक्ततादृशविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षादावस्या
एवं च वादिसाऽऽहुः । मीमांसकानुयायिनस्तु व्यतिरेकव्याप्तिज्ञानादर्थापत्त्याख्यविलक्षणायाः प्रमितेरेवोत्पत्तेर्न त्वनु
मितिः तदनन्तरमर्थापत्त्या पापीति विलक्षणानुभवप्रायस्येवोत्पत्तेः अनुभवप्रामाण्यानादरे व्याप्यवत्तानिर्णया
धीनप्रत्यक्षात्मकसाध्यनिर्णयादेव प्रवृत्त्यादिकार्यनिर्वाहे तानुमित्यात्मकाविलक्षणायाः प्रमितेरप्युत्पत्त्यापत्ता

५ म

भा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

प्र.त.॰ ऽनुमानस्याप्रमाणतानुपपत्तेरिति व्यतिरेकव्याप्तिज्ञाने प्रमाणान्तरमेवानवकानुभवव्यवसायबलात् व्यतिरेकव्याप्ति

२५ ज्ञानजन्यमानुमितौ मिथ्यात्वतावज्जातिविशेषः एतावदनुमितित्वव्याप्यरूपेति [illegible] नव्यतिरेकव्या

प्तिज्ञानस्य प्रमाणान्तरत्वेनेति वाच्यं तादृशज्ञानेऽनुमितित्वव्याप्यत्वे मानाभावात् नवार्थापत्तित्वमनुमितौ । तावि

शिष्टत्वे विशिष्टकाले तद्वारणापत्तेः अपि च भावस्य कारणतावच्छेदकत्वस्य अनुमितित्वव्याप्यत्वे तु अनुमितित्वावच्छिन्न

प्रतितेष्टत्वकल्पने गौरवापत्तेः लाघवमिति वाच्यं विशिष्टकालेऽर्थापत्त्युपगमे क्षतिविरहात् । वस्तुतस्तु विशिष्ट

कालेऽर्थापत्त्यनुत्पादस्य प्रामाणिकत्वेऽपि तत्र प्रतिबंधकत्वकल्पने मानाभावस्य कं अर्थापत्तित्वप्रकारकेच्छासि

४ वार नानुमितौ व्यभिचारेणानुमित्साविरहविशिष्टाभावजन्यतावच्छेदककोटौ अर्थापत्तिच्छावत्त्वविशेषणाप्रक्षे

प स्वावच्छेदकतयाऽर्थापित्सामानुमितिं प्रति सुलौ प्रतिबंधकतया अर्थापत्तिद्वारणासंभवात् । नवार्थापत्तित्वप्रका

रकेच्छासाधारणानुमितिविषयकेच्छात्वेनैवानुमित्साया उत्तेजकत्वात्तादृशेच्छाधीनार्थापत्तौ अनुमित्साविरहवि एप॰

शिष्टसिद्ध्यभावसत्त्वाद्व्यभिचार इति वाच्यं अर्थापत्तित्वप्रकारकेच्छासाधारणरूपेणानुमित्साया उत्तेजकत्वे तादृशेच्छा २५

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मत्वे व्यतिरेकव्याप्तिज्ञानानपेक्षोपि हेतुत्वानुमितसामग्र्यास्तेः । अथानुमित्यव्यवहितताहशोक्ताभावत्वरूपेणानौ ते न कत्वं अपि
न ताहशोक्ताभावस्यापि व्यतिरेकपरामर्शादिहेतुत्वाविशेषात्वेन हेतुत्वेन कत्वं इति चेन्न दपेक्षयाश्रयाथापत्तेः अर्थाप
त्तिव्याविरहाविशिष्टमिद्धेः स्वप्रतिबंधकत्वमेव कल्पमिति मुचितं अर्थापत्तित्वस्यानुमितित्वाविरुद्धत्वे प्रमाणा
भं चं नद्ध शाब्दार्थापत्तिरनुमितिर्वा क्रिकारणयोस्तु विनिगमनाविरहः उभयोरपि समे वव्याप्तिकल्पनाबा
ऊल्पं च कैः पौर्वापर्यं मिति वा हकारशास्त्रात कल्पनाभिरुक्तं चानवतेत्रैकि ममिमनोसूयत इति वाच्यं आज्ञानस्मासामा
नुमानादस्मानुभवविरुद्धत्वात् । सामग्र्या मते कार्यस्यादेवाधकाभावाद्वेति चेन्न । अर्थापत्तिं प्रति अनुमितिसाम
ग्र्या अनुमितिं प्रति अर्थापत्तिसामग्र्या वा प्रतिबंधकत्वकल्पनेनैवानुपपत्त्यभावात् । न चैताहशप्रतिबंध
काभावकल्पने गौरवमिति वाच्यं घटादिप्रत्यक्षं प्रति तथाविधसामग्र्याः प्रतिबंधकत्वे कल्पनीये
प्रत्यक्षादिकं प्रति नश्यतावच्छेदककोटावनिवेशात्ताहशसामग्रीविशिष्टान्यत्वावच्छिन्नं प्रति ताहशसामग्री
त्वेन प्रतिबंधकत्वकल्पने क्लृप्ते न निर्वाहः संभवाताान्नचोपदर्शितसामग्र्या एवं बलवद्दशायांसामान्यसामग्री

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ति

बलादेकाधिकरणपरस्यापत्तिर्दुर्वारेति वाच्यं तत्रानुमितिकामनायाः सामग्र्याः फलजनकत्वे । व्याप्तिकामनायाः व्याप्ति
ज्ञानकामनायाः फलजनकत्वेनानुमितिकामनाया अभावस्य सहकारित्वकल्पने गौरवात् सिद्धिदशायां भवतो नच परस्परस
हकारित्वकल्पने गौरवमिति वाच्यं तत्र व्याप्तिकामनेऽनुमितिकामनाभावयोः परस्परं सहकारित्वकल्पने पूर्व
तो व्याप्तिमात्रानुमितिसामग्र्यादेः बहुसंभवस्थापकीभूताभावप्रतियोगित्वादिमात्र सर्वतो व्याप्तिसाकारकप्रत्यक्ष
काविशिष्टप्रत्यक्षसामग्रीकाले आवादेः सहकारित्वाकल्पनलाघवस्य जागरूकत्वात् । एवं तादृशप्रत्यक्षेकाविशि
ष्टप्रत्यक्षसामग्रीकाले व्याप्तिपत्तिसामग्र्या अव्यापकत्वेन व्याप्तिपत्तिसामग्र्याभावघटितानुमितिसामग्र्या अन्य
वे तत्तदानीमनुमित्यनुत्पादनिर्वाहे गानुमितौ लाघ शब्दसामग्र्याः प्रतिबंधकत्वाकल्पनप्रयुक्तलाघवमपि तत्रानुमि
त्यादिकं वा तत्र व्याप्तिप्रत्यक्षसामग्र्याः प्रतिबंधकत्वकल्पनावादिमतेऽप्युक्तमेवेत्याहुः ॥ ॥ इति नव्यमताविचारः ॥ श्रीरामः

ग्र

६९५

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative